॥ समाधि-पादः ॥

॥ Samādhi-Pādaḥ ॥

ओं परमात्मने नमः ॥

ōṃ paramātmanē namaḥ ॥

श्री पातञ्जल-योग-दर्शनम् ॥

śrī pātañjala-yōga-darśanam ॥

॥ अथ समाधि-पादः ॥

॥ Atha Samādhi-Pādaḥ ॥

अथ योगानुशासनम् ॥१॥

atha yōgānuśāsanam ॥1॥

योगश्चित्तवृत्ति-निरोधः ॥२॥

yōgaścittavṛtti-nirōdhah ॥2॥

तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥३॥

tadā draṣṭuḥ svarūpē'vasthānam ॥3॥

वृत्ति-सारूप्यम् + इतरत्र ॥४॥

vṛtti-sārūpyam + itaratra ॥4॥

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥५॥

vṛttayaḥ pañcatayyaḥ kliṣṭākliṣṭāḥ ॥5॥

प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः ॥६॥

pramāṇa-viparyaya-vikalpa-nidrā-smṛtayaḥ ॥6॥

प्रत्यक्षानुमानागमाः प्रमाणानि ॥७॥

pratyakṣānumānāgamāḥ pramāṇāni ॥7॥

विपर्ययो मिथ्या-ज्ञानम् +अतद्रूप-प्रतिष्ठम् ॥८॥

viparyayō mithyā-jñānam +
atadrūpa-pratiṣṭham ॥8॥

शब्द-ज्ञानानुपाती वस्तु-शून्यो विकल्पः ॥९॥

śabda-jñānānupātī vastu-śūnyō vikalpaḥ ॥9॥

अभाव-प्रत्ययालम्बना वृत्तिर् + निद्रा ॥१०॥

abhāva-pratyayālambanā vṛttir + nidrā ॥10॥

अनुभूत-विषयासंप्रमोषः स्मृतिः ॥११॥

anubhūta-viṣayāsampramōṣaḥ smṛtiḥ ॥11॥

अभ्यास-वैराग्याभ्यां तन्निरोधः ॥१२॥

abhyāsa-vairāgyābhyāṃ tannirōdhaḥ ॥12॥

तत्र स्थितौ यत्नोऽभ्यासः ॥१३॥

tatra sthitau yatnō'bhyāsaḥ ॥13॥

स तु दीर्घ-काल-नैरन्तर्य-सत्कारासेवितो
दृढ-भूमिः ॥१४॥

sa tu dīrgha-kāla-nairantarya-satkārāsēvitō
dṛḍha-bhūmiḥ ॥14॥

दृष्टानुश्रविक-विषय-वितृष्णस्य वशीकार-संज्ञा
वैराग्यम् ॥१५॥

dṛṣṭānuśravika-viṣaya-vitṛṣṇasya vaśīkāra-
sañjñā vairāgyaṃ ॥15॥

तत्परं पुरुष-ख्यातेर् + गुण-वैतृष्ण्यम् ॥१६॥

tatparaṃ puruṣa-khyātēr +guṇa-vaitṛṣṇyam ll16ll

वितर्क-विचारानन्दास्मिता-रूपानुगमात् संप्रज्ञातः ॥१७॥

vitarka-vicārānandāsmitā-rūpānugamāt
samprajñātaḥ ll17ll

विराम-प्रत्ययाभ्यास-पूर्वः संस्कार-शेषो न्यः ॥१८॥

virāma-pratyayābhyāsa-pūrvaḥ
saṃskāra-śēṣō'nyaḥ ll18ll

भव-प्रत्ययो विदेह-प्रकृति-लयानाम् ॥१९॥

bhava-pratyayō vidēha-prakṛti-layānām ll19ll

श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-पूर्वक इतरेषाम् ॥२०॥

śraddhā-vīrya-smṛti-samādhi-prajñā-pūrvaka
itarēṣām ll20ll

तीव्र-संवेगानाम् + आसन्नः ॥२१॥

tīvra-saṃvēgānām + āsannaḥ ll21ll

मृदु-मध्याधिमात्रत्वात् ततोऽपि विशेषः ॥२२॥

mṛdu-madhyādhimātratvāt tatatō'pi viśēṣah ll22ll

ईश्वर-प्रणिधानाद् + वा ॥२३॥

īśvara-praṇidhānād + vā ll23ll

क्लेश-कर्म-विपाकाशयैर् + अपरामृष्टः पुरुष-विशेष
ईश्वरः ॥२४॥

klēśa-karma-vipākāśayair + aparāmṛṣṭaḥ
puruṣa-viśēṣa īśvaraḥ ll24ll

तत्र निरतिशयं सर्वज्ञ-बीजम् ॥२५॥

tatra niratiśayaṃ sarvajña-bījam ll25ll

स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥२६॥

sa ēṣa pūrvēṣāmapi guruḥ
kālēnānavacchēdāt ll26ll

तस्य वाचकः प्रणवः ॥२७॥

tasya vācakaḥ praṇavaḥ ll27ll

तज्जपस्तदर्थ-भावनम् ॥२८॥

tajjapastadartha-bhāvanam ll28ll

ततः प्रत्यक्-चेतनाधिगमोऽप्यन्तरायाभावश्च ॥२९॥

tataḥ pratyak-cētanādhigamō'pyanta-
rāyābhavaṣca ll29ll

व्याधि-स्त्यान-संशय-प्रमादालस्याविरति-भ्रान्ति-
दर्शनालब्ध-भूमिकत्वानवस्थितत्वानि
चित्त-विक्षेपास्तेऽन्तरायाः ॥३०॥

vyādhi-styāna-saṃśaya-pramādālasyāvirati-
bhrānti-darśanālabdha-bhūmikatvānavasthitatvāni
citta- vikṣēpāstē'ntarāyāḥ ll30ll

दुःख-दौर्मनस्याङ्ग-मेजयत्व-श्वास-प्रश्वासा
विक्षेप-सहभुवः ॥३१॥

duḥkha-daurmanasyāṅga-mējayatva-śvāsa-
praśvāsā vikṣēpa-sahabhuvah ll31ll

तत्प्रतिषेधार्थम् + एक-तत्त्वाभ्यासः ॥३२॥

tatpratiṣēdhārtham + ēka-tattvābhyāsaḥ ll32ll

मैत्री-करुणा-मुदितोपेक्षाणां सुख-दुःख-पुण्यापुण्य-
विषयाणां भावनातश्चित्त-प्रसादनम् ॥३३॥

maitrī-karuṇā-muditōpēkṣāṇām sukha-
duḥkha-puṇyāpuṇya-viṣayāṇām
bhāvanātaścitta-prasādanam ll33ll

प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य ॥३४॥

pracchardana-vidhāranābhyāṃ vā prāṇasya ll34ll

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थिति-
निबन्धनी ॥३५॥

viṣayavatī vā pravṛttirutpannā manasaḥ sthiti-
nibandhanī ll35ll

विशोका वा ज्योतिष्मती ॥३६॥

viśōkā vā jyōtiṣmatī ll36ll

वीत-राग-विषयं वा चित्तम् ॥३७॥

vīta-rāga-viṣayaṃ vā cittam ll37ll

स्वप्न-निद्रा-ज्ञानालम्बनं वा ॥३८॥

svapna-nidrā-jñānālambanaṃ vā ll38ll

यथाभिमत-ध्यानाद्-वा ॥३९॥

yathābhimata-dhyānād-vā ll39ll

परमाणु-परम-महत्त्वान्तोऽस्य वशीकारः ॥४०॥

paramāṇu-parama-mahattvāntō'sya
vaśīkāraḥ ll40ll

क्षीण-वृत्तेर् + अभिजातस्येव मणेर् + ग्रहीतृ-ग्रहण-
ग्राह्येषु तत्स्थ-तदञ्जनता समापत्तिः ॥४१॥

kṣīṇa-vṛttēr + abhijātasyēva maṇēr + grahītṛ-
grahaṇa-grāhyēṣu tatstha-tadañjanatā
samāpattiḥ ll41ll

तत्र शब्दार्थ-ज्ञान-विकल्पैः संकीर्णा सवितर्का
समापत्तिः ॥४२॥

tatra śabdārtha-jñāna-vikalpaiḥ saṅkīrṇā
savitarkā samāpattiḥ ll42ll

स्मृति-परिशुद्धौ स्वरूप-शून्येवार्थमात्र-निर्भासा
निर्वितर्का ॥४३॥

smṛti-pariśuddhau svarūpa-
śūnyēvārthamātra- nirbhāsā nirvitarkā ll43ll

एतयैव सविचारा निर्विचारा च सूक्ष्म-विषया
व्याख्याता ॥४४॥

ētayaiva savicārā nirvicārā ca sūkṣma-viṣayā
vyākhyātā ll44ll

सूक्ष्म-विषयत्वं चालिङ्ग-पर्यवसानम् ॥४५॥

sūkṣma-viṣayatvaṃ cāliṅga-paryavasānam ||45||

ता एव सबीजः समाधिः ॥४६॥

tā ēva sabījaḥ samādhiḥ ||46||

निर्विचार-वैशारद्येऽध्यात्म-प्रसादः ॥४७॥

nirvicāra-vaiśāradyē'dhyātma-prasādaḥ ||47||

ऋतम्भरा तत्र प्रज्ञा ॥४८॥

ṛtambharā tatra prajñā ||48||

श्रुतानुमान-प्रज्ञाभ्याम् + अन्य-विषया विशेषार्थत्वात् ॥४९॥

śrutānumāna-prajñābhyām + anya-viṣayā viśēṣārthatvāt ||49||

तज्जः संस्कारोऽन्य-संस्कार-प्रतिबन्धी ॥५०॥

tajjaḥ saṃskārō'nya-saṃskāra-pratibandhī ||50||

तस्यापि निरोधे सर्व-निरोधान्निर्बीजः समाधिः ॥५१॥

tasyāpi nirōdhē sarva-nirōdhānnirbījaḥ samādhih ||51||

॥ इति श्री पातञ्जल-योग-दर्शने

समाधि-पादो नाम प्रथमः पादः॥

|| Iti śrī pātañjala-yōga-darśanē

samādhi-pādō nāma prathamaḥ pādaḥ ||